# দশাবতারস্তোত্রম্

{॥ দশাবতারস্তোত্রম্ ॥}

নমোঽস্তু নারাযণমন্দিরায নমোঽস্তু হারাযণকন্ধরায ।

নমোঽস্তু মৎস্যায লযাব্ধিগায নমোঽস্তু কূর্মায পযোব্ধিগায ।

নমো বরাহায ধরাধরায নমো নৃসিংহায পরাৎপরায ॥ ২॥

নমোঽস্তু শক্রাশ্রয-বামনায নমোঽস্তু বিপ্রোৎসব-ভার্গবায ।

নমোঽস্তু সীতাহিত-রাঘবায নমোঽস্তু পার্থস্তুত-যাদবায ॥ ৩॥

নমোঽস্তু বুদ্ধায বিমোহকায নমোঽস্তু তে কল্কি-পযোদিতায ।

নমোঽস্তু পূর্ণামিতসদ্গুণায সমস্ত-নাথায হযাননায ॥ ৪॥

করস্থ-শঙ্খোল্লস-দক্ষমালা-প্রবোধ-মুদ্রাভয-পুস্তকায ।

নমোঽস্তু বক্ত্রোদ্গির-দাগমায নিরস্ত হেযায হযাননায ॥ ৫॥

রমাসমাকার-চতুষ্টযেন ক্রমাচ্চতুর্দিক্ষু নিষেবিতায ।

নমোঽস্তু পার্শ্বদ্বযগ-দ্বিরূপশ্রিযাভিষিক্তায হযাননায ॥ ৬॥

কিরীট-পট্টাঙ্গদ-হার-কাঞ্চী-সুরত্নপীতাংবর-নূপুরাদ্যৈঃ ।

বিরাজিতাঙ্গায নমোঽস্তু তুভ্যং সুরৈঃ পরীতায হযাননায ॥ ৭॥

বিদোষ-কোটীন্দু-নিভপ্রভায বিশেষতো মধ্ব-মুনি-প্রিযায।

বিমুক্তবন্দ্যায নমোঽস্তু বিশ্বগ্গিধৃত-বিঘ্নায হযাননায ॥৮॥

নমোঽস্তু শিষ্টেষ্টদ বাদিরাজকৃতাষ্টকাভিষ্টুত-চেষ্টিতায ।

দসাবতারৈ-স্ত্রিদসার্থদায নিশেশ-বিংবস্থ হযাননায ॥ ৯॥

নমোঽস্তু পারাযণচর্চিতায নমোঽস্তু নারাযণ্ তেঽর্চিতায ॥ ১॥

॥ ইতি বাদিরাজপূজ্যচরণ-বিরচিতং দশাবতারস্তোত্রং সম্পূর্ণম্ ॥

Encoded and proofread by N.Balasubramanian bbalu at satyam.net.in

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Dashavatara Stotram 1 ( By Vadiraja Theertha ) Lyrics in Bengali PDF
% File name : dashAvatArastotra.itx
% Location : doc_vishhnu
% Author : vAdirAja
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : N.Balasubramanian bbalu at satyam.net.in
% Proofread by : N.Balasubramanian bbalu at satyam.net.in
% Latest update : June 5, 2006, January 2, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website